चतुर्दशः पाठः

# वणिजः कृपणता

कस्मिंश्चित् ग्रामे कश्चन् वणिक आसीत्। सः अतीव कृपणः।

कदाचित् सः वाणिज्यनिमित्तं पार्श्वस्थं नगरं गतवान् आसीत्। तत्र वाणिज्यं समाप्य गृहं प्रत्यागतः सः यदा स्वस्य कोष्ठं पश्यति तदा तेन ज्ञातं यत् तत्र स्थापितः धनस्यूतः एव न आसीत्। तस्मिन् दिने वाणिज्यतः प्राप्तानि चतुस्सहस्ररूप्यकाणि तत्र आसन्। सः सम्यक् स्मृतवान् यत् ग्रामप्राप्तिपर्यन्तमपि कोषे स धनस्यूतः आसीदेव इति । अतः ग्रामे एव सः पतितः केनापि प्राप्तः स्यात् इति। सः ग्रामप्रमुखस्य समीपं गत्वा तं निवेदितवान् यत् एतद्विषये ग्रामे घोषणा करणीया इति।

तदनुसारं ग्रामे सडिण्डिमं घोषणा कारिता यत् 'यः तं धनस्यूतम् अन्विष्य आनीय ददाति तस्मै चतुश्शतं रूप्यकाणि पारितोषिकरूपेण दीयन्ते' इति।

संयोगेन काचित् वृद्धा तं धनस्यूतं प्राप्तवती आसीत्। किन्तु भीता सा चिन्तितवती यत् यदि एतं विचारम् अन्यान् वदामि तर्हि जनाः मया एव चौर्यं कृतम् इति चिन्तयन्ति इति। तदा एव सा घोषणां श्रुतवती। निश्चिन्तभावेन ग्रामप्रमुखस्य समीपं गत्वा तस्मै धनस्यूतं समर्पितवती। उक्तवती च यत् "देवालयतः आगमनमार्गे मया एषः धनस्यूतः प्राप्तः। मया अत्र किमस्ति इत्यपि न दृष्टम्। घोषणां श्रुत्वा झटिति आगतवती अस्मि। एतस्य स्वामिने एतं ददातु इति।

ग्रामप्रमुखः तस्याः सत्यनिष्ठया सन्तुष्टः अभवत्। सः वृद्धाम् अभिनन्द्य तं वणिजम् आनेतुं सेवकं प्रेषितवान्। एतां वार्ता: ज्ञात्वा नितरां सन्तुष्टः वणिक् धावन् एव तत्र आगतवान्।

तस्मै स्यूतं समर्पयन् ग्रामप्रमुखः अवदत्– "एषा महोदया धन्यवादार्हा। इदानीं भवदीयं कर्तव्यम् अस्ति यत् एतस्यै चतुश्शतरूप्यकाणि दातव्यानि इति।

एतत् श्रुत्वा कृपणः चिन्तितवान्– "मदीयं धनं प्राप्तमेव। तन्मध्ये चतुश्शतरूप्यकाणि कुतः दातव्यानि .....? केनापि उपायेन तानि अपि सञ्चिनोमि इति।

तस्य मनसि एकः उपायः स्फुरितः। सः तं धनस्यूतं उद्घाट्य सर्वेषां पुरतः धनं गणितवान्। अनन्तरम् उक्तवान् यत्- अस्मिन् धनस्यूते चतुश्शताधिकचतुस्सहस्त्ररूप्यकाणि आसन्। इदानीं तु चतुस्सहस्त्ररूप्यकाणि एव सन्ति। अवश्यम् एतया वृद्धया एव तानि रूप्यकाणि स्वीकृतानि सन्ति। उपायनराशिं सा स्वयमेव स्वीकृतवती अस्ति इति।

वणिजः मिथ्यारोपेण हतप्रभा जाता सा वृद्धा। दुःखेन सा उक्तवती– "भोः, नाहम् असत्यं वदामि। धनस्यूतः न मया उद्घाटितः। यदि तत् धनं चोरणीयम् इति मम इच्छा स्यात् तर्हि किमर्थम् अत्र आगत्य धनस्यूतं दद्याम् ..........." इति।

ग्रामप्रमुखः ज्ञातवान् यत् 'अयं वणिक् न केवलं कृपणः, अपि तु असत्यवादी शठः अपि' इति। अतः सः किञ्चित् विचिन्त्य उक्तवान्– "भवता पूर्वमेव वक्तव्यम् आसीत् यत् धनस्यूते 4,400 रूप्यकाणि आसन् इति" इति।

वणिक् उक्तवान्– "अहं विस्मृतवान् तदा" इति। एतत् श्रुत्वा ग्रामप्रमुखः क्रोधेन– "एवं चेत् भवान् अस्य धनस्यूतस्य स्वामी नैव। अद्य एव ममापि धनस्यूतः नष्टः। तत्र तु 4000 रूप्यकाणि एव आसन्। अतः एषः मम एव धनस्यूतः" इति उक्त्वा तं धनस्यूतं स्वीकृतवान्।

स्वीयया दुराशया प्राप्तमपि धनं पुनः हस्तच्युतं ज्ञात्वा सः लुब्ध वणिक् विलापम् अकरोत्।

## अभ्यासः

1. अनया कथया का शिक्षा प्राप्यते?
2. कृपणता करणीया न करणीया वा?
3. वणिक् कीदृशः आसीत्?
4. ग्रामप्रमुखः कीदृशः आसीत्?